# ॥ આયુષ્ય સૂકતમ ॥

યો બ્રહ્મા બ્રહ્મણ ઉજ્જહાર પ્રાણૈઃ શિરઃ કૃત્તિવાસાઃ પિનાકી ।
ઈશાનો દેવઃ સ ન આયુર્દધાતુ તસ્મૈ જુહોમિ હવિષા ઘૃતેન ॥ ૧ ॥

વિભ્રાજમાનઃ સરિરસ્ય મધ્યા-દ્રોચમાનો ઘર્મરુચિર્ય આગાત ।
સ મૃત્યુપાશાનપનુદ્ય ઘોરાનિહાયુષેણો ઘૃતમત્તુ દેવઃ ॥ ૨ ॥

બ્રહ્મજ્યોતિ-ર્બ્રહ્મ-પત્નીષુ ગર્ભં યમાદધાત પુરુરૂપં જયન્તમ ।
સુવર્ણરંભગ્રહ-મર્કમર્ચ્યં તમાયુષે વર્ધયામો ઘૃતેન ॥ ૩ ॥

શ્રિયં લક્ષ્મી-મૌબલાં અંબિકાં ગાં ષષ્ઠીં ચ યામિન્દ્રસેનેત્યુદાહુઃ ।
તાં વિદ્યાં બ્રહ્મયોનિગં સરૂપામિહાયુષે તર્પયામો ઘૃતેન ॥ ૪ ॥

દાક્ષાયણ્યઃ સર્વયોન્યઃ સ યોન્યઃ સહસ્રશો વિશ્વરૂપા વિરૂપાઃ ।
સસૂનવઃ સપતયઃ સયૂથ્યા આયુષેણો ઘૃતમિદં જુષંતામ ॥ ૫ ॥

દિવ્યા ગણા બહુરૂપાઃ પુરાણા આયુશ્છિદો નઃ પ્રમથ્નંતુ વીરાન ।
તેભ્યો જુહોમિ બહુધા ઘૃતેન મા નઃ પ્રજાગં રીરિષો મોત વીરાન ॥ ૬ ॥

એકઃ પુરસ્તાત ય ઈદં બભૂવ યતો બભૂવ ભુવનસ્ય ગોપાઃ ।
યમપ્યેતિ ભુવનગં સાંપરાયે સ નો હવિર્ઘૃત મિહાયુષેત્તુ દેવઃ ॥ ૭ ॥

વસૂન રુદ્રાન આદિત્યાન મરુતોટથ સાધ્યાન ઋભૂન યક્ષાન ગન્ધર્વાગ્શ્ચ પિતૃગ્શ્ચ વિશ્વાન ।
ભૃગૂન સર્પાગ્શ્ચાંગરિસોટથ સર્વાન ઘૃતગં હુત્વા સ્વાયુષ્યા મહયામ શશ્વત ॥ ૮ ॥

વિષ્ણો ત્વં નો અન્તમશ્શર્મયચ્છ સહન્ત્ય ।
પ્રતેધારા મધુશ્ચુત ઉત્સં દુહ્રતે અક્ષિતં ॥

ઓં શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

www.YouSigma.com